**D.A.V. PUBLIC SCHOOLS, ODISHA**
**PERIODIC ASSESSMENT-I, 2023-24**

- Please check that this question paper contains **04** printed pages.
- Check that this question paper contains **11** questions.
- Write down the Serial Number of the question in the left side of the margin before attempting it.

**CLASS –IX**
**SUBJECT – COMMUNICATIVE SANSKRIT (Code No. 119)**

**Time: 1.30 hrs** **Maximum Marks-40**

**निर्देशा: -**

- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

| | |
|---|---|
| खण्ड: -क (अपठित- अवबोधनम्) | (5 अङ्काः) |
| खण्ड: -ख (रचनात्मकं कार्यम्) | (5 अङ्काः) |
| खण्ड:- ग (अनुप्रयुक्तव्याकरणम्) | (15 अङ्काः) |
| खण्ड: -घ (पठित -अवबोधनम्) | (15 अङ्काः) |

- सर्वे प्रश्ना: अनिवार्याः ।
- प्रश्नसङ्ख्या खण्डा: च क्रमानुसारं लेखनीयाः ।
- उत्तराणि संस्कृतेन एव लेखनीयानि ।

**खण्ड: - क (अपठित- अवबोधनम्) (5 अङ्काः)**

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** (5)

यदि मनः प्रसन्नम् अस्ति तर्हि वयं सर्वाणि कार्याणि सम्यक् कर्तुं शक्नुमः । मनः खिन्नं असन्तुष्टं वा अस्ति चेत् अस्माकं प्रेरणा न भवति । अतः मनसः प्रसन्नतारक्षणम् अत्यन्तम् आवश्यकम् । जयपराजययोः आरम्भः अपि जनानां मनसि भवति । स्नेहस्य शत्रुतायाः आरम्भः अपि तेषां मनसि एव भवति । जनैः सदा भावात्मकचिन्तनं करणीयम् । अभावात्मकचिन्तनकर्ता जीवने सर्वत्र कष्टानि एव अनुभवति । अत एव उक्तम्-मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।

I. **एकपदेन उत्तरत -** (½x2=1)

(क) बन्धमोक्षयोः कारणं किम् अस्ति ?

(ख) कस्य प्रसन्नतारक्षणम् अत्यन्तम् आवश्यकम् ?

II. **पूर्णवाक्येन उत्तरत -** (1 x1=1)

कदा वयं सर्वाणि कार्याणि कर्तुं शक्नुमः ?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत -** **(1x1=1)**

**IV. निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत -** **(1x2=2)**

(क) 'अथवा' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?

(i) अपि (ii) वा (iii) अतः (iv) यदि

(ख) 'आरम्भः' इति पदस्य किं क्रियापदम् अनुच्छेदे प्रयुक्तम् ?

(i) अनुभवति (ii) तेषां (iii) मनसि (iv) भवति

## खण्ड: - ख ( रचनात्मकं कार्यम्) (5 अङ्का:)

**2. भवान् सुरेशः। भवता स्वजन्मदिवसमुपलक्ष्य मित्रं प्रति लिखितं निमन्त्रणपत्रं मञ्जूषायां प्रदत्तपदैः पूरयत पत्रं च पुनः उत्तरपुस्तिकायां लिखत -** **(½x10=5)**

(i)----------

दिनाङ्कः- ----------

प्रिय मित्र (ii)-----------!

सप्रेम (iii)-------------- ।

शुभसमाचारः यत् अस्मिन् वर्षे मम जन्मदिवसः आगामि- रविवासरे (iv)-------- । जनकेन लघुसमारोहस्य (v)----------- कृतम् । पूजायाः कार्यक्रमः (vi)--------- भविष्यति। तत्पश्चात् (vii)--------- भविष्यति। सर्वाणि अपि मम (viii)------- सपरिवारम् अत्र आगमिष्यन्ति । तुभ्यम् अपि निमन्त्रणं प्रेषयामि । सपरिवारः उचितसमये आगत्य समारोहस्य शोभावर्द्धनं (ix) ----- ।

तव (x)-------

सुरेश:

**मञ्जूषा-** (आयोजनं, रमेश, मित्राणि, चतुर्वादने, कुरु, नमोनमः, भविष्यति, जलपानं, मित्रम्, दिल्लीतः)

## खण्ड: - ग ( अनुप्रयुक्तव्याकरणम्) (15 अङ्काः)

**3. निर्देशानुसारम् उत्तरत -** **(½x2=1)**

(क) " **व्** " वर्णस्य उच्चारणस्थानं किम् ?

(ख) " अपि " इति पदे " **प्** " वर्णस्य उच्चारणस्थानं किम् ?

**4. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत -** **(1x3=3)**

(क) किन्तु **बालस्यात्र** रक्षकः नास्ति।

(ख) स्वभाव एवैष **पर + उपकारिणाम्** ।

(ग) मथ्यमानात् **काष्ठादग्निः** जायते ।

5. **विकल्पेभ्यः चित्वा उपयुक्त -शब्दरूपैः रिक्तस्थानानि पूरयत -** (1x4=4)

(क) ---------- सर्पं भक्षयति ।

(i) गरुडेन (ii) गरुडः (iii) गरुडाः (iv) गरुडम्

(ख) --------- एकं प्रश्नं पृच्छामि ।

(i) अहम् (ii) त्वम् (iii) बालकः (iv) सः

(ग) वृक्षेषु---------- शोभन्ते ।

(i) फलानि (ii) फलम् (iii) फलैः (iv) फलेभ्यः

(घ) ---------- कविताः रचयन्ति ।

(i) कविः (ii) कवी (iii) कवयः (iv) कविना

6. **विकल्पेभ्यः चित्वा उपयुक्तधातुरूपैः रिक्तस्थानानि पूरयत -** (1x4=4)

(क) तत्र अनेकाः मनोरञ्जकाः नीतिकथाः --------------।

(i) अस्ति (ii) स्तः (iii) सन्ति (iv) असि

(ख) चिरकालपालितं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य अहं --------- ।

(i) गच्छति (ii) गच्छसि (iii) गच्छन्ति (iv) गच्छामि

(ग) सुभाषितानि एव अस्माकं जीवने मार्गदर्शनं --------------।

(i) करोति (ii) कुर्वन्ति (iii) कुरुतः (iv) करोमि

(घ) अत्र स्यूते त्वं किमेतत् ----------------- ?

(i) नयामि (ii) नयथः (iii) नयसि (iv) नयति

7. **वाक्यानुगुणम् उचित-अव्ययपदं मञ्जूषायाः चित्वा रिक्तस्थानं पूरयत -** (1 x 3=3)

(क) बालक ! ----------------- आगच्छ , उपविश ।

(ख) अधुना वर्षाऋतुः, ----------------- जलप्लावनं दृश्यते ।

(ग) ----------------- योगेश्वरः कृष्णः तत्र विजयः निश्चितः ।

**मञ्जूषा-** (सर्वत्र, अत्र, यत्र)

## खण्डः - घ (पठित- अवबोधनम्) (15 अङ्काः)

8. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** (5)

अस्ति उज्जयिन्यां माधवः नाम विप्रः । एकदा तस्य भार्या स्वबालापत्यस्य रक्षार्थं तमवस्थाप्य स्नातुं गता । अथ ब्राह्मणः राज्ञा श्राद्धार्थं निमन्त्रितः । ब्राह्मणः सहजदारिद्र्यात् अचिन्तयत् - यदि सत्वरं न गच्छामि तदा अन्यः कश्चित् श्राद्धार्थं वृतः भवेत् ।

**I. एकपदेन उत्तरत-** (½x2=1)

(क) माधवः कुत्र अवसत् ?

(ख) ब्राह्मणः केन निमन्त्रितः ?

II. **पूर्णवाक्येन उत्तरत-** **(1x2=2)**

(क) ब्राह्मणः किम् अचिन्तयत् ?

(ख) ब्राह्मणस्य भार्या कुत्र गता ?

III. **निर्देशानुसारम् उत्तरत -** **(1x2=2)**

(क) अस्ति उज्जयिन्यां माधवः नाम विप्रः ।- अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम् ?

(ख) यदि सत्वरं न गच्छामि - अत्र 'शीघ्रं' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?

9. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **(5)**

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।

I. **एकपदेन उत्तरत -** **(½x2=1)**

(क) पृथिव्यां कति रत्नानि सन्ति ?

(ख) कुत्र रत्नानि सन्ति ?

II. **पूर्णवाक्येन उत्तरत-** **(1x2=2)**

(क) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ?

(ख) रत्नानि कानि सन्ति ?

III. **निर्देशानुसारम् उत्तरत -** **(1x2=2)**

(क) 'त्रीणि रत्नानि' अत्र विशेषणं किम् ?

(ख) 'पण्डितैः' इति पदस्य किं विलोमपदं श्लोके प्रदत्तम् ?

10. **मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत-** **(½x4=2)**

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि जले लिखितमक्षरम् ।।

अन्वयः– (क) ---------- तु लीलया प्रोक्तं (ख)------- अक्षरम् (इव भवति परं) असद्भिः तु
(ग) ----------- अपि (प्रोक्तं) जले लिखितम् (घ) ----------- (इव भवति) ।

**मञ्जूषा** – ( शिलालिखितम्, अक्षरम्, सद्भिः, शपथेन)

11. **रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं विकल्पेभ्यः चिनुत -** **(1x3=3)**

(क) ब्राह्मणः परं विषादम् अगच्छत् ।

(i) आनन्दं (ii) दुःखम् (iii) सन्तोषम् (iv) क्रीड़नम्

(ख) स्थितिरूच्चैः पयोदानाम् ।

(i) पर्वतानाम् (ii) नदीनाम् (iii) मेघानाम् (iv) नराणाम्

(ग) शोकसमो रिपुः नास्ति ।

(i) मित्रं (ii) शत्रुः (iii) जलं (iv) चिन्ता

******************